# Ganapati Stotram 4

# ગણપતિસ્તોત્રમ્ ૪

## Document Information

Text title : gaNapatistotram 4

File name : gaNapatistotram4.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Yash Khasbage

Proofread by : Yash Khasbage

Latest update : June 17, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2020

*sanskritdocuments.org*

Ganapati Stotram 4

# ગણપતિસ્તોત્રમ્ ૪

જેતું યસ્ત્રિપુરં હરેણ હરિણા વ્યાજાદ્બલિં બધ્નતા
    સ્રષ્ટું વારિભવોદ્ભવેન ભુવનં શેષેણ ધર્તું ધરમ્ ।
પાર્વત્યા મહિષાસુરપ્રમથને સિદ્ધાધિપૈઃ સિદ્ધયે
    ધ્યાતઃ પઞ્ચશરેણ વિશ્વજિતયે પાયાત્ સ નાગાનનઃ ॥ ૧॥

વિઘ્નધ્વાન્તનિવારણૈકતરણિર્વિઘ્નાટવીહવ્યવાડ્
    વિઘ્નવ્યાલકુલાભિમાનગરુડો વિઘ્નેભપઞ્ચાનનઃ ।
વિઘ્નોત્તુઙ્ગગિરિપ્રભેદનપવિર્વિઘ્નામ્બુધેર્વાડવો
    વિઘ્નાઘૌઘઘનપ્રચણ્ડપવનો વિઘ્નેશ્વરઃ પાતુ નઃ ॥ ૨॥

ખર્વં સ્થૂલતનું ગજેન્દ્રવદનં લમ્બોદરં સુન્દરં
    પ્રસ્યન્દન્મદગન્ધલુબ્ધમધુપવ્યાલોલગણ્ડસ્થલમ્ ।
દન્તાઘાતવિદારિતારિરુધિરૈઃ સિન્દૂરશોભાકર
    વન્દે શૈલસુતાસુતં ગણપતિં સિદ્ધિપ્રદં કામદમ્ ॥ ૩॥

ગજાનનાય મહસે પ્રત્યૂહતિમિરચ્છિદે ।
અપારકરુણાપૂરતરઙ્ગિતદૃશે નમઃ ॥ ૪॥

અગજાનનપદ્માર્કં ગજાનનમહર્નિશમ્ ।
અનેકદન્તં ભક્તાનામેકદન્તમુપાસ્મહે ॥ ૫॥

શ્વેતાઙ્ગં શ્વેતવસ્ત્રં સિતકુસુમગણૈઃ પૂજિતં શ્વેતગન્ધૈઃ
    ક્ષીરાબ્ધૌ રત્નદીપૈઃ સુરનરતિલકં રત્નસિંહાસનસ્થમ્ ।
દોર્ભિઃ પાશાઙ્કુશાબ્જાભયવરમનસં ચન્દ્રમૌલિં ત્રિનેત્રં
    ધ્યાયેચ્છાન્ત્યર્થમીશં ગણપતિમમલં શ્રીસમેતં પ્રસન્નમ્ ॥ ૬॥

આવાહયે તં ગણરાજદેવં રક્તોત્પલાભાસમશેષવન્દ્યમ્ ।
વિઘ્નાન્તકં વિઘ્નહરં ગણેશં ભજામિ રૌદ્રં સહિતં ચ સિદ્ધ્યા ॥ ૭॥

યં બ્રહ્મ વેદાન્તવિદો વદન્તિ પરં પ્રધાનં પુરુષં તથાઽન્યે ।

વિશ્વોદ્ભતેઃ કારણમીશ્વરં વા તસ્મૈ નમો વિજ્ઞવિનાશનાય ॥ ૮॥

વિઘ્નેશ વીર્યાણિ વિચિત્રકાણિ વન્દીજનૈર્માગધકૈઃ સ્મૃતાનિ ।
શ્રુત્વા સમુત્તિષ્ઠ ગજાનન ત્વં બ્રાહ્મે જગન્મઙ્ગલકં કુરુષ્વ ॥ ૯॥

ગણેશ હેરમ્બ ગજાનનેતિ મહોદર સ્વાનુભવપ્રકાશિન્ ।
વરિષ્ઠ સિદ્ધિપ્રિય બુદ્ધિનાથ વદન્ત એવં ત્યજત પ્રભીતીઃ ॥ ૧૦॥

અનેકવિઘ્નાન્તક વક્રતુણ્ડ સ્વસંજ્ઞવાસિંશ્ચ ચતુર્ભુજેતિ ।
કવીશ દેવાન્તકનાશકારિન્ વદન્ત એવં ત્યજત પ્રભીતીઃ ॥ ૧૧॥

અનન્તચિદ્રૂપમયં ગણેશં હ્યભેદભેદાદિવિહીનમાદ્યમ્ ।
હૃદિ પ્રકાશસ્ય ધરં સ્વધીસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૨॥

વિશ્વાદિભૂતં હૃદિ યોગિનાં વૈ પ્રત્યક્ષરૂપેણ વિભાન્તમેકમ્ ।
સદા નિરાલમ્બસમાધિગમ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૩॥

યદીયવીર્યેણ સમર્થભૂતા માયા તયા સંરચિતં ચ વિશ્વમ્ ।
નાગાત્મકં હ્યાત્મતયા પ્રતીતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૪॥

સર્વાન્તરે સંસ્થિતમેકમૂઢં યદાજ્ઞયા સર્વમિદં વિભાતિ ।
અનન્તરૂપં હૃદિ બોધકં વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૫॥

યં યોગિનો યોગબલેન સાધ્યં કુર્વન્તિ તં કઃ સ્તવનેન નૌતિ ।
અતઃ પ્રણામેન સુસિદ્ધિદોઽસ્તુ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૬॥

દેવેન્દ્રમૌલિમન્દારમકરન્દકણારુણાઃ ।
વિઘ્નાન્ હરન્તુ હેરમ્બચરણામ્બુજરેણવઃ ॥ ૧૭॥

એકદન્તં મહાકાયં લમ્બોદરગજાનનમ્ ।
વિઘ્નનાશકરં દેવં હેરમ્બં પ્રણમામ્યહમ્ ॥ ૧૮॥

યદક્ષરં પદં ભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ પ્રસીદ પરમેશ્વર ॥ ૧૯॥

ઇતિ શ્રીગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Yash Khasbage

*Ganapati Stotram 4*

pdf was typeset on June 17, 2020

Please send corrections to *sanskrit@cheerful.com*